[4] देवस्येति-ख. [5] दीयैरेववे-ख. दीयैर्वैरा-ग. [6] रणस्यापि-क.ख.ग.
[7] स्याप्यननु-घ. [8] ङ्गः नाम-क. ङ्गः स्नूम-ग. [9] भ इवा-घ.
[10] यत्तादृक्-क. [11] पारा-क.ख.

माधवः—(कटाक्षेण वैनतेयं निवारयति)

नारदः—(माधवं प्रति) सा तु [1]त्वय्येवास्मदादिवचनोपन्यासैर्गाढानुरागा वर्तते । अतस्[2]त्वयाऽनुनेतव्या सुतरामवि[3]लम्बेन ।

वैनतेयः—(स्वगतम्) कथमयमस्मदादिवचनैरित्यात्म[4]प्रशंसां करोति ।

[5]माधवः—यद्रोचते देवर्षिवर्याय ।

वैनतेयः—किमालोच्यते विदितवेदितव्यैरपि भवद्भिः ?

या सर्वमोहजननैक[6]रसैव माया
यस्तद्वशीकरणसाहससारसीमा ।
तां तञ्च वञ्चयितुमेष्यति कश्चनेति
भ्रान्तानुरूपमिह केन कृतः प्रलोभः ॥ ४५ ॥

माधवः—([7]साक्षेपम्) अलमलं वृथा वागाडम्बरेण । देवर्षि[8]वचः समाद्रियताम् ।

नारदः—जानाम्येवं तथापि बहिर्बुध्या [9]प्रस्तूयत एतत् ।

---

[1] त्वययैवा-ख.घ. [2] त्वया एनां ने-क. त्वया न ने-ग. [3] लम्बनेन-क.घ. [4] प्रशंसा-ग. [5] 'माधवः' इत्यारभ्य 'प्रलोभः' इत्यन्तो भागः क. मातृकायां नास्ति । [6] रसैकमाया-क. [7] असाक्षेपम्-क. सापेक्षं-ग. वचनं-क. [8] वचनः-ग. [9] प्रसूयत-ग.

माधवः—

या नो मुञ्चति मा[1]मनन्य[2]शरणा प्रेमानुबन्धोज्ज्वला
यस्या [3]नर्म[4]कृतः क्षणं च विरहः कल्पान्तदायी मतेः।
सा देशान्तरमेत्य जीवति [5]परस्तां काङ्क्षते [6]त्वद्गिरा
[7]लक्ष्मीर्मय्यनुरागिणीति तदहो लज्जाकुलं मे मनः॥ ४६॥

नारदः—व्यावहारिकोऽयं वचनोपन्यासः। वस्तुतस्तु -

यथैव सर्वभूतानामीशितेति प्रथा तव।
[8]येन सा चेतना[9]माप्ता को भेदो युवयोस्तयोः॥ ४७॥

[10]अथ लौकिकीं [11]रीतिमनुसृत्य स्वयंवरव्याजे[12]नानुनेतव्या।

[13]वैनतेयः—एतदेव मे रोचते।

[14]गत्वा स्वयंवरमहोत्सवदर्शनाय
कृत्वा सुरासुर[15]चमूं न च पूजनार्हाम्।
हत्वा प्रियामनुसृतिप्रवणामनन्यां
छित्वा व्यथां हृदयजां शममेति तूर्णम्॥ ४८॥

---

[1] मन्यश-क. मनस्यश-घ. [2] शरणप्रे-क.ग. [3] मर्मक्र-क. [4] कृतक्षणं-क.ख.घ. [5] पुरस्तां-घ. [6] तद्गिरा-क.ग. [7] लक्ष्मीमय्यनु-क.ख.घ. [8] येन वा-क. [9] माप्तो-क. [10] अथो-क.ग. अतो-घ. [11] रिति-क.ग. [12] नानुते-क. [13] 'वैनतेयः' इत्यारभ्य 'रोचते' इत्यन्तो भागः क.ग. मातृकयोः नास्ति। [14] तव्या-क. [15] चमूमसहाक्रियार्हाम्-क.ग.घ.

नारदः—युक्तमुक्तं वैनतेयेन ।

माधवः—यद्भवद्भ्यां रोचते ।

(नेपथ्ये)

यश्च [1]लोकैकवीरस्याद्यः कल्याणगुणाकरः ।
स एवास्तु प्रियो भर्ता कन्यायाः कलशाम्बुधेः ॥ ४९ ॥

सर्वे सविस्मयमाकर्णयन्ति ।

(प्रविश्य [2]प्रतीहारी)

प्रतीहारी—जेदु जेदु देवो ।

(जयतु जयतु देवः ।)

माधवः—[3]कस्येदमुदितम् ।

प्रतीहारी—वलुणाणु अरंस ।

(वरुणानुचरस्य ।)

वैनतेयः—शीघ्रं प्रवेशयैनम् ।

नारदः—[4]तथा क्रियताम् ।

---

[1] लोकवीरस्याद्यः क. [2] 'प्रतीहारी'-क. नास्ति । प्रतिहारी-ग.घ. [3] तस्येद-क. [4] कथा-घ.

[1]प्रतीहारी—णद्धि खु एसो पडिहालंमि एंति अउंतवंतो गदो एंव ।

(नास्ति खल्वेष प्रतीहारे एतावदुक्तवान् गत एव)

(इति यश्चेत्यादि पठति)

माधवः—[2]तदुद्ध[3]तमेवैनं वृत्तान्तमनु[4]कलयामः ।

नारदः—तद्गम्यतामचिरेण देवेन वरुणनगरीपरिसरं प्रति । अहमाकाश-गमनेनोपगच्छामि ।

(इति निष्क्रान्तः)

वैनतेयः—आरुह्यतां मम [5]स्कन्धपीठं अत्र भवान् [6]प्रभुः ।

माधवः—(तथेत्यारोहणं नाटयति)

वैनतेयः—(गतित्वरामभिनीय)

लक्ष्यन्[7]ते गिर[8]यो लतादिपिहिताः पृथ्वीस्तनाभोग[9]वत्
क्षोणीमण्ड[10]लरङ्गवल्लि[11]कलनां सप्ता[12]र्णवी विन्दति ।
आयातीव नभस[13]समक्षपदवीमायाममु[14]त्सृज्य तं
[15]देवे मद्भुजपीठगामिनि नभस्सीमानमारोहति ॥ ५० ॥

---

[1] 'प्रतीहारी'-ग. नास्ति । [2] तद्भुत-ख-घ. 'तदुद्ध'-ग. नास्ति । [3] तमेनं-क.ग. [4] कलाया-क.ग. [5] स्कन्धवीर अ-क. [6] 'प्रभुः'-क. नास्ति । [7] तेऽतिर-क. [8] यो अनादि-क. [9] वत्कोणी-क.घ. [10] लररङ्ग-क. [11] कलना स-क. [12] र्णवीं-क.ग. र्णवि-घ. [13] सपक्ष-क.ग.घ. [14] त्सृत्य तं-क. त्सृज्य तां-घ. [15] देवे मुद्भववीरगा-क.

माधवः—सत्यमेतत् । (साश्चर्यं निर्वर्ण्य)

अहो ! वयमे[1]कोत्पतनेनैव [2]वरुणनगरीमाप्ताः स्मः ।

तथा हि—

ताडचन्ते निघिडं महोत्सवपुषो माङ्गल्यतूर्यादयः
[3]द्राव्यन्ते [4]मदमत्त[5]वारुणगणैरा[6]गत्वरा[[7]येऽ] सुराः ।
चातुर्वर्ण्यगतागतैरविरलश्रेणी पुरी लक्ष्यते
[8]सेयं वक्ति बहिर्विमानपटली स्वायंवरोपक्रमम् ॥ ५१ ॥

(इति निष्क्रान्तौ ।)

॥ इति प्रथमोऽङ्कः ॥

द्वितीयोऽङ्कः ।

(ततः प्रविशति कञ्चुकी)

कञ्चुकी—अहो ! चिरेण [9]कुमारन्यस्त[10]प्रतीहाराधिकारो विश्रान्तिसुखमनुभवामि । तथा हि—

---

[1] कोत्पसत-क. [2] वरुणान-क. [3] वार्यन्ते-ग. [4] मवम-क. [5] वारण-ख.ग.घ. [6] गत्यरा-क. [7] यो सुराः-क. ये सुराः-ख.ग.घ. [8] नेयं-ख. [9] 'कुमार'-क.ग. नास्ति । [10] प्रतिहा-क.ग.

यदीक्षितं नेक्षितमेव, यच्छ्रुतं
तदश्रुतं, यच्च हितं [1]तदन्यथा ।
अधीतमन्तःपुर[2]चारिणां [3]क्रमं
[4]परं किमध्यापयितुं सहेत धीः ॥ १ ॥

(इति परिक्रम्य पुरोऽवलोक्य) कथमियं भर्तृदारिकायास्सखी मनोरञ्जनी नाम । भवत्वाभाषयामि । अयि [5]मनोरञ्जनि ! कुतो वा कुत्र प्रस्थितासि ?

मनोरञ्जनी—देवीणां संदेसादो भंटिदारिआये परिक्कालसामंगी समाणअणंथं कोसघरं पंथिदोंह्मि ।

(देवीनां सन्देशाद्भर्तृदारिकायाः परिष्कारसामग्रीसमानयनार्थं कोशगृहं प्रस्थितास्मि ।)

कञ्चुकी—[6]अहो ! मौग्ध्यमन्तः[7]पुरिकाजनस्य ।

वपुर्जगद्भूषयति स्वयं यत्
कथन्नु तद्भूषणमीहतेऽन्यत् ।
जगत्प्रकाशावहसूर्यविम्ब-
प्रकाशने [8]कि[न्न्वि]ह साधनं स्यात् ॥ २ ॥

---

[1] तवान्य-क. [2] चारिणं-ग. [3] क्रमः-क. [4] पुरं-घ.
[5] मनोरञ्जनी-क.ख.ग. [6] अह्मो-ग. [7] पुरेका-क.ग.
[8] किन्विह-क.ख.ग. किन्त्विह-घ.

मनोरञ्जनी—अंअ एंवंएदं तहवि सोहंगसोहंथं एदं ववसिदं अवि अ ।
(आर्य ! एवमेवैतत् । तथाऽपि सौभाग्यशोभार्थमेतद्यवसितम् ।
अपि च ।)

कञ्चुकी—ज्ञातं ज्ञातं, स्वयंवरावसर इति [1]नेप[2]थ्यरचनोपयोगः ।

मनोरञ्जनी—अह इं ?
(अथ किम्?)

कञ्चुकी—[3](विहस्य)
रत्नाकरसुताया यद्रत्नाभरणधारणम् ।
मन्ये नेपालभूपालकन्याकस्तूरि[4]कार्पणम् ॥ ३ ॥

परन्तु स्वानुरूपवरलाभ एव आशास्यो वत्सायाः ।

मनोरञ्जनी—(विहस्य)कहं अंदेवुरचालिणोवि अंजंस उंतंतविणाणं णंधि ।
(कथमन्तःपुरचारिणोऽप्यार्यस्य वृत्तान्तविज्ञानं नास्ति ।

कञ्चुकी—एतावदेव जानामि । [5]यदुद्घोपितं दूतमुखेन भगवता सागराधिराजेन, यश्च लोकैकवीरः स्यात् । ([6]इत्यादि पठति ।)

---

[1] नैपथ्य-घ. [2] थ्यवचनो-क. [3] 'विहस्य'-क. नास्ति ।
[4] कावर्णनम्-क.ग. [5] यदुद्भूपितं-क. [6] इति-क.ख.ग.

मनोरञ्जनी—तारिसं पुरिसं कंणु तंकेसि ?

(तादृशं पुरुषं कं नु तर्कयसि ?)

कञ्चुकी—(विचिन्त्य)

[1]योऽसौ मन्मथमन्मथ[2]श्शर[3]णगत्राण [4]प्रवीणश्शुचिः
शूराणामधिदैवतं सुरचमूकोटीररज्ज्यत[5]पदः ।
आम्नायैक[6]पदं निरन्तरवयश्शालीनतालंङ्कृतः
सारस्सर्व[7]जगद्गणस्य जयति श्रीमानसौ [8]माधवः ॥ ४ ॥

स एव कन्यायाः अनुरूपवल्लभ इति तर्कयामि । किन्तु....

मनोरञ्जनी—सावसेसं विअ अअंस वअणं ।

(सावशेषमिवार्यस्य वचनम् ।)

कञ्चुकी—भर्तृदारिकायाः कं प्रत्यभि[9]लापो वर्तते ?

मनोरञ्जनी—णखु गोवणिंजं किंवि आंअंस तंसिंएव अहिणिवेसो माहवे भंटिदारिआए ।

(न खलु गोपनीयं किमप्यार्याय तस्मिन्नेवाभिनिवेशो माधवे भर्तृदारिकायाः)

---

[1] योसा-घ. [2] श्शरगण-ख. [3] णसत्राण-ग. णत्राण-ख.
[4] प्रवीरश्शुचिः-क. प्रवीणश्शुचिः-ख. [5] पथं-क-ग-घ. [6] पदं-ख.ग.घ.
[7] जगत्जनस्य-क.ग.घ. [8] राघवः-क. [9] लापो व-क.

कञ्चुकी—इदानीमानन्दतुन्दिलं मे मनः ।

इनं [1]कमलिनी यद्व[2]दिन्दुं [3]कैरविणी यथा ।
माधवं रमणं प्राप्य मनोज्ञाति[4]तरां [5]रमा ॥ ५ ॥

तथापि किमपि [6]छद्माचरिष्यन्ति [7]दानवा [8]इति श्रूयते ।

मनोरञ्जनी—अंअ किंणुएदं ?

(आर्य [9]किन्वेतत् ?)

कञ्चुकी—न भेतव्यं न भेतव्यम् ।

वितत्य [10]वैष्णवीं मायां [11]वीरः श्रीमाधवः स्वयम् ।
अशेषमाया[12]सन्दोहमाशु संशोषयिष्यति ॥ ६ ॥

मनोरञ्जनी—तह जदि उज्जीविदह्म ।

(तथा यद्युज्जीविताःस्मः ।)

[13]**कञ्चुकी**—एवमेतत् ।

---

[1] कमकमलिनी-क. [2] दिमं-क.ग. [3] कैवरिणी-ग. कैरवणी ख.घ. [4] तरा-क. [5] मया-ग. ममा-घ. [6] चम्वाच-ग. [7] दानवादयः-ग.घ. दानवा वयमिति-क. [8] 'इति'-क. नास्ति । [9] किन्त्वेतत्-क. [10] वैष्णवीमा-क. [11] वीरश्रीमाधवः-क.ग.घ. [12] सम्मोह-क.ग. [13] 'कञ्चुकी-एवमेतत्' क. नास्ति ।

(नेपथ्ये)

सुरवासवमौनिसिद्ध[1]साध्योरगविद्याधरयक्षराक्षसाद्याः ।
वरुणानु[2]चरोपनीत[3]वार्तामु[4]परुध्योपगताः स्वयंवरार्थम् ॥७॥

कञ्चुकी—(ससम्भ्रमम्) अहं राजकुलमुपगच्छामि समयोचिता[5]चरणाय त्वमपि[6]देवी[7]निर्देशमशून्यं कुरु ।

(इति निष्क्रान्तौ।)

(मिश्रविष्कम्भः।)

(ततः प्रविशति रमा सखी देव्यश्च)

देव्यः—अपि नाम पर्याप्त[8]माभरण[9]जालं वत्सायाः ।

सखी—देविहिं जह आणंतं तह किदंएवं ।

(देवीभिः [10]यथाऽऽज्ञप्तं तथा कृतमेव ।)

रमा—(सखीमपवार्य) अंज सोअंवरंथलं ठिदाणं देंवादीणं मंझमि संचलणं कादंवोंति लंजा मे हिअअंस ।

(अद्य स्वयंवरस्थलस्थितानां देवादीनां मध्ये सञ्चरणं कर्तव्यमिति लज्जा मे हृदयस्य)

---

[1] सध्यो गरुडोर-क.ग. [2] चनीत-क. [3] वाताप-क. वातामुदुप-घ. [4] परुद्योपता-क. [5] चरणीय-क.ग. [6] 'देवी'-ख. नास्ति । [7] निर्देशं शू-ग. [8] मारण-क. [9] जातं व-क.ग. [10] यदाज्ञ-घ.

सखी—(रमामपवार्य) हला ! जह आणंतं देविहिं तह कादंवंएव्वं ।
(हला ! यथाऽऽज्ञप्तं देवीभिस्तथा कर्तव्यमेव ।)

देव्यः—(निर्वर्ण्य)

विधानमस्याः खलु [1]भूषणानां
पिधानमेवातनुतेऽङ्गलक्ष्म्याः ।
तथापि सौभाग्यविवर्धनाय
वितन्यते वीरवरोचितायाः ॥ ८ ॥

सखी—(रमां प्रति सहर्षं संस्कृतमाश्रित्य)

सखि ! ते विधृतिर्विभूषणानां
सुजना[2]चारवशादिति प्रतीमः ।
परमङ्गविलासमङ्गलाना-
मवनं [3]यौवनमेव भूषणानि ॥ ९ ॥

रमा—(माल्येन ताडयति ।)

देव्यः—वत्से ! त्वमाज्ञप्तास्यस्माभिः स्वयंवराभिगमनाय । अत एवानया सख्या [4]सह तमुद्देशमु[5]पेहि । यावद्वयमपि [6]गवाक्षपथेन प्रासा[7]दस्थाः पश्यामः ।

(इति निष्क्रान्ताः।)

---

[1] भूषणां-घ. [2] चारमिति प्र-क.ग. [3] यद्धन-क,
[4] सहित-क. [5] पैति-घ. [6] वाक्षप-ग. [7] दस्य-ख.ग.घ.

सखी—हला इदो । हला इदो ।

(हला ! इतः । हला ! इतः ।)

रभा—जं रोअदि पियसहिए ।

(यद्रोचते प्रियसख्यै ।) (इति शनैर्गच्छति ।)

(ततः प्रविशतो वैतालिको विदूषकश्च ।)

वैतालिकः—अहमादिष्टोस्मि महा[1]राजेन वरुणेन यथा "[2]वत्स कौसुम्भ ! गच्छ स्वयंवरमण्टपोद्देशम् । यतः तत्र[3]मिलितानां सुरासुरादीनां [4]कुलशीलादिवर्णनं वत्सायाः निकटे कर्तव्य"मिति, [5]ततो यथा [6]निर्देशमाचरामि । (इति परिक्रामति ।)

विदूषकः—हं आदिंठोह्मि महालाअ वलुणेण जह अले कीसमुह जाव आअंछदि सोअंवलमंडवं वंजा लमा दावएंवं तुएवि पंसवंठिणा ताणं ताणं देंवादीणं गुणदोसंपअडणकालिण होदंवोंति । तह कलिअ महसंवें जह मणोरहं गोहुम-अवुवभंखणं कलेमि ।

(अहमादिष्टोऽस्मि महाराजवरुणेन यथा अरे ! कीशमुख ! यावदागच्छति स्वयंवरमण्टपं वत्सा रमा, तावदेव त्वयापि पार्श्ववर्तिना तेषां तेषां देवादीनां गुणदोषप्रकटनकारिणा भवितव्यम्

---

[1] राजव-ख. [2] "वत्स कौसुम्भ"-क,ग. नास्ति । वत्स कौकुम्भक-घ. [3] मिलानां-घ, [4] कुशल-ग. [5] तथो-घ, [6] निदेश-ख.

इति । तथा कृत्वा महोत्सवे यथामनोरथं गोधूमापूपभक्षणं करोमि ।) (इति परिक्रामति ।)

सखी—हला ! णखु एसो ओसरो लज्जाए ।
ता कहंवि धेरं गिहिअ संवाणं
गिंवाणादीणं णेंतुंसहवं करेहि ।

(हला ! न खल्वेषोऽवसरो लज्जायाः ।
तस्मात् कथमपि धैर्यं गृहीत्वा सर्वेषां गीर्वाणादीनां नेत्रोत्सवं कुरु ।)

(रमा कथञ्चित् स्वयंवरस्थलप्रवेशं नाटयति ।)

वैतालिकः—(निर्वर्ण्य) [1]कथमागतैव, भर्तृदारिका, सखी च ! तद्यथोचितमग्रतो भूत्वा [2]सर्वेषां कुलशीलादिकं वर्णयामि । (इति उपसर्पति ।)

विदूषकः—एसा भंठिदारिअ । (इत्यग्रतो भूत्वा) जेदु जेदु भंठिदारिअ ।

(एषा भर्तृदारिका । (इत्यग्रतो भूत्वा) जयतु जयतु भर्तृदारिका ।)

वैतालिकः—जयतु भर्तृदारिका । जयतु भर्तृदारिका ।

---

[1] गथ-ग. [2] "सर्वेषां"-क.ग. नास्ति ।

[1]मनोरञ्जनी—अए वेतालिअ संवाणं कुलसीलादिअं णिवेदेहि सहिए ।

(अये वैतालिक ! सर्वेषां कुलशीलादिकं निवेदय सख्यै ।)

वैतालिकः—अयि भर्तृदारिके ! चक्षुरितो [1]विक्षिप्यतां किञ्चिदत्र भवत्या ।

मञ्चावलीषु मदनोपमदिव्यदेहाः
माणिक्यभूषणविनिर्भितसूर्यमोहाः ।
मन्दो[2]दयं तरुणि[3]मोत्थमद[4]प्ररोहाः
मध्ये स्वयंवरतलं सुमनस्समूहाः ॥ १० ॥

मनोरञ्जनी—हला भंठिदारिए ! एदाणं मंझंमि कोंवि जइ अहिलासविसओ पेंखदु होदि ।

(हला भर्तृदारिके ! एतेषां मध्ये कोऽपि यद्यभिलाषाविषयः पश्यतु भवती ।)

विदूषकः—किंणु एदेहिं दाणवावसदेहिं जेक्लि भंलूएहिंविअ वलीमुहा खणे खणे वि विंदावअंदि देवेहिं ।

---

[1] इयमेव रमायाः सखो ।

---

[1] विज्ञप्यतां-क. [2] दयत्तरु-ग.घ. [3] मोद्गम-क. [4] प्ररोहा-ग.

(किन्त्वेतैर्दानवापशदैर्ये किरु भल्लूकैरिव वलीमुखाः क्षणे क्षणेऽपि विद्राव्यन्ते देवैः ।)

रमा—(सखीं प्रति) पुलो मंगं आवेदेहि ।

(पुरो मार्गमावेदय ।).

(सखी तथा करोति)

वैतालिकः—

[[1]ये]षामीपत्कर[2]मिव सुरानीकविद्रावणं स्यात्
आजन्म श्री[3]महितभवनं मन्दिरं चापि [4]येषाम् ।
अध्येतारो निगमवितते रग्निहोत्र[5]प्रवेकाः
मध्ये [6]मञ्चं विदधति मुदं दानवा मानवर्याः ॥ ११ ॥

मनोरञ्जनी—हला ! भंठिदारिए ! जाणासि तुमं एदाणं कोंवि अणुरुंवोति ।

(हला भर्तृदारिके ! जानासि त्वमेतेषां कोप्यनुरूप इति ।)

विदूषकः—

णिंदयकिदहिंसाणं णिंवेलमदाणुरुंवचलिदाणं ।
किणु किलदाणवाणं किलासालिंतणं अपुंणाणं ॥ १२ ॥

(निर्दयकृतहिंसानां निर्वेलमदानुरूपचरितानाम् ।
किन्नु किल दानवानां क्रीडाशालित्वमपुण्यानाम् ॥)

---

[1] षामी–क. एषामी-ख,घ,वेषामी-ग. [2] 'मिव'-ख. नास्ति । [3] महिवि-क. [4] एषाम्–क.ख.ग. [5] प्रवेश-क. [6] कञ्च–क.

रमा—सहि गंछदु पुलदो होदि ।

(सखि ! गच्छतु पुरतो भवती ।)

(इति सर्वे परिक्रामन्ति ।)

वैतालिकः—अहो ! एतेषा[1]मा[2]भिरूप्य[3]मद्य विद्या[4]धरादीनामुपदेव-समुद[5]यानाम् ।

अणिमादिसिद्धिरपि च स्वभावजा
[6]गणनातिलङ्घि विभ[7]वास्पदं पदम् ।
अनि[8]शानपायकलितं नवं वयः
क्व नु भाति [9]तौल्यमुपदेवसम्पदाम् ॥ १३ ॥

मनोरञ्जनी—हला ! पेंख एदाणं रमणिजंतणं ।
(हला पश्य एतेषां रमणीयत्वम् ।)

विदूषकः—(विहस्य) दिंठा एंवं सदसो एदेवि ।

पादुअंवजणपाणभाअणं
छंतचामलकलंकधालणं ।
संकमुंकसविहे कलंदि जे
किंणु दाण उणदंसणेण दे ॥ १४ ॥

---

[1] मभि-क. [2] भितोप्य-क. [3] मव्य-क. [4] धराध्याना-ख.घ. [5] यादीनाम्-क. [6] वणनाति-घ. [7] वास्य स-क. [8] शापान-ख. [9] लौल्य-क.

(दृष्टा एव शतशः एतेऽपि,
पादुकाव्यजनपानभाजनछत्रचामरकरङ्कधारणम् ।
शक्रमुख्यसविधे कुर्वते ये किन्तु तेषां पुनर्दर्शनेन ते ।)

रमा—(अन्यतो दृष्टिं प्रेरयति ।)

सखी—इदो इदो ।
(इत इतः ।)

वैतालिकः—इदमत्र नयनरसायनम् ।

यद्दोर्दण्डविजृम्भिश[1]म्ब[2]विदल[3]त्पक्षाः पुरा भूधराः
[4]वि[द्रु]त्याब्धिममुं सदा शरणयन्त्यन्तर्जले यन्त्रिताः ।
सर्वेषामपि यस्सुपर्वसदसामग्रेसरश्श्रीकरः
[5]सोऽयं दीव्यति मञ्चसीमनि शचीकौमारहारी हरिः ।।१५।।

किञ्च,

सुर[6]भूरुह एव पुष्पवाटी
[१]म[7]णिरस्यामर एव रत्नपेटी ।

---

[१] आमरः अमरेभ्यः प्रदत्तः यः मणिः स एव अस्य इन्द्रस्य रत्नपेटी ।
'मणिरत्नाकर एव' इति पाठः स्याद्वा ?

---

[1] शम्भवि-ग. [2] विदलित्प-क.ख. [3] त्पक्षा पु-क. [4] विधृत्या-क.ख.ग. विध्रृत्या-घ. [5] सोऽय-ख. [6] भूरूह-क.ख.ग. [7] णितस्या-क.

पुर एव वसत्यजस्रगण्या
[1]सुरराजस्य सुखानुभूति[2]कोटी ॥ १६ ॥

मनोरञ्जनी—हला ! एदंस पेंखदु महणिजंतणं जदि मणोरहो होदीए ।

(हला ! एतस्य पश्य महनीयत्वं यदि मनोरथो भवत्याः ।)

विदूषकः—(विहस्य) णादम् । णादम् । एदंस पलंक्कमविलसिदं । आकुंचिअसीसेण वावाराणंत लंथ सोंख्रेण समओणेण खु णीदोसहजेहिं किल हिरंणअसिवुधरे । अवि अ ओहरिदवाहणेणं पंभंट-मणुंणरंणमउडेण पंतोणेण पलिहवोसंकेण चिलं हिरंणअसिवुघरे । (ज्ञातम् । ज्ञातम् । एतस्य पराक्रमविलसितम् । आकुञ्चित-शीर्षेण व्यापाराज्ञसलब्धसौख्येन समयोऽनेन खलु नीतस्सहजैः किल हिरण्यकशिपुगृहे । अपि च अपहृतवाहनेन प्रभ्रष्टमनोज्ञ-रत्नमकुटेन प्राप्तोऽनेन परिभवश्शङ्केण चिरं हिरण्यकशिपुगृहे ।)

रमा—हला ! पुलदो गंछ ।

(हला ! पुरतो गच्छ ।)

(सर्वे तथा कुर्वन्ति ।)

वैतालिकः—

यस्तेजोनिधिरित्यतीव हविषां दाता सुराणामिति
प्रायः संयमिभिः [3]क्रतुष्वविरता मोदेन [4]जेगीयते ।

---

[1] सुतरा-क. [2] कोऽपि-क.ख.ग. [3]कृतु-क.ख. [4] जीगीयते-ग.

माहात्म्यैकखनिर्महाबलसुहृन्मा[1]न्यस्त्रयीसन्ततेः
स्वाहाजा[2]निरयं चकास्ति पुरतः [3]सम्प्राप्तसौम्याकृतिः ॥१७॥

मनोरञ्जनी—हला ! सुदं तुए एदंस उलसीलादिअं ।
(हला ! श्रुतं त्वया एतस्य कुलशीलादिकम् ।)

विदूषकः—णिवुणं खु णादं संवेहिं विविंठिवीअ देवाणं सीसेणाहलिअ अंणकवलाणि विंसंतिं णलहमाणो किंसदिएसोंति णिअमसंवादो ।
(निपुणं किल ज्ञातं सर्वैरपि वृष्टिहारीव देवानां शीर्षेणाहृत्य अन्नकबलानि विश्रान्तिमलभमानः क्लिश्यत्येष इति निगमसंवादः ।)

रमा—हला! इदो इदो आअंछ ।
(हला ! इत इत आगच्छ ।)
(इति सर्वे परिक्रामन्ति ।)

वैतालिकः—(हस्तमुद्यम्य)

धर्मो विग्रहवानेष
दाक्षिण्यविहितालयः ।
प्रतिबिम्ब इवार्यम्णः
[4]प्रतिभाति [5]प्रभामयः ॥ १८ ॥

---

[1] न्यर्यी-घ. [2] नियुच-क. [3] सप्राप्त-क.घ. [4] प्रभाति-क.ग. [5] प्रतिभामियः-कं.ग.

मनोरञ्जनी—किंणु वंटदि सहिए मणंमिति तंकेमि ।

(किन्नु वर्तते सख्याः मनसीति तर्कयामि ।)

विदूषकः—णिलवहिअ हिंसापलेंति ।

(निरवधिकहिंसापर इति ।)

रमा—किंणु एदेण कालं खेवेण ।

(किन्वेतेन कालक्षेपेण ।)

(सर्वे पदान्तरं गत्वा)

वैतालिकः—

[1]निर्ऋतिरेष विजयते निरुपमसाहाय्यनिर्जितारातिः ।
दिक्पालकस्तुरीयस्त्रिषु सामादिषु चतुर्थ इव दण्डः ॥१९॥

मनोरञ्जनी—पेंखदु होदि अणुरूवो णवेंति ।

(पश्यतु भवती अनुरूपो न वेति ।)

विदूषकः—णादपुंवो एंवं एसो-

अणुसलइ सुलसमाजं अणुवंटदि दाणवादिअं सजणं ।
वुहअं भंटो एसो केण वुण सिलाहणिंजविहवंढो ॥ २० ॥

---

[1] नियुतिरे-क. निऋतिवेषः-ग. निर्ऋुति-ख. निऋति-घ.

(ज्ञातपूर्व एवैषः ।-
अनुसरति सुरसमाजं अनुवर्तते दानवादिकं स्वजनम् ।
उभयभ्रष्ट एष केन पुनः श्लाघनीयविभवाढ्यः ॥)

रमा—हला ! पुलो मंगं आवेदेहि ।

(हला ! पुरो मार्गमवेदय ।)

मनोरञ्जनी—इदो इदो ।

(इत इतः ।)

(सर्वे परिक्रामन्ति ।)

वैतालिकः—

यदुपासनया परं मुनीन्द्राः
नियतं सौख्यमयं [1]तृणादयन्ते ।
सुमनोगणसङ्घसम्प्रदायः
प्रचुरामोद[2]वहः स गन्ध[3]वाहः ॥ २१ ॥

मनोरञ्जनी—हला ! भंटिदारिए एसो पेंक्खिजदु जअंपाणो ।
(हला ! भर्तृदारिके ! एष पश्यतां जगत्प्राणः ।)

विदूषकः—भंखदि णाम कीडा तिंखंस हुदासणंस जं मिंत जंस सदा गइखेदो तं सरिसं केणुमंणंति ।

---

[1] त्रणा-ग.घ. [2] वहास्स-क. वहास्सु-ग. [3] वाहाः-क.ख.

(भक्षयन्ति नाम कीटाः तीक्ष्णस्य हुताशनस्य यन्मित्रं यस्य संदा गतिखेदः तं सदृशं केऽनुमन्यन्ते ।)

रमा—अन्यतो गच्छति ।

वैतालिकः—

अयं प्रियं मित्रमलीकदृष्टेः अखण्डभोगैकनिधेः [1]परस्य ।
निधान[2]नाथैकपदाभिदेयः प्रधानदिक्पालक एष धीरः
॥ २२ ॥

अस्य चैत्ररथं नाम [3]वनं मधुरसावनम् ।
यस्य पौरन्दरावास[4]नन्दनं नन्दनायते ॥ २३ ॥

मनोरञ्जनी—हला ! जदि णेंताणं पंतं एसो होदिए । संवं सुहोदंकं हविसदि ।
(हला ! यदि नेत्रयोः पात्रमेष भवत्याः । सर्वं शुभोदर्कं भविष्यति ।)

विदूषकः—

एषो खु दुंगकुविदंखिकोणं
पतंत णेंतोदिअ पीदरीदि ।
पसिंधवाणिजपदाहिआरो
पंथावपंतं किमु पुंणभाजं ॥ २४ ॥

---

[1] पदस्य-क.-ग. [2] नादैक-घ. [3] वनस्य-क. [4] नन्दनन-ख.

(एष खलु दुर्गाकुपिताक्षिकोण-
प्रतप्तनेत्रोदितपीतरीतिः ।
प्रसिद्धवाणिज्यपदाधिकारः
प्रस्तावपात्रं किमु पुण्यभाजाम् ॥)

(रमा—अवधीरणां नाटयति ।)

वैतालिकः—

अमीशिवागस्त्य[1]मयेन्द्रचन्द्रमाः
[2]कुवेरविघ्नेश्वरशेषनारदाः ।
रविगुरुश्चापि महोत्सवेक्षण-
[3]प्रसंगिनो माधवपार्श्वगामिनः ॥ २५ ॥

रमा—(स्वगतम् ।)

पतंतचामीअरमंजुलंवरो
पपुंल भंमंवुजमंलकंधरो ।
सुपंणकंठपिदवाहुदंणओ
विलोचणाणं पदिसेदि मे सुहम् ॥ २६ ॥

(प्रतप्तचामीकरमञ्जुलाम्बरः
प्रफुल्लभर्माम्बुजमाल्यकन्धरः ।
सुपर्णकण्ठार्पितवाहुदण्डको
विलोचनाभ्यां प्रदिशन्ति मे सुखम् ॥)

---

[1] यमेंन्द्र-ग. [2] कुजेर-क, कुवैर-ख. [3] प्रसंसदो-क, प्रशंसतो-ग.

(प्रकाशम्) हला ! मणोरंजणि, अतिमेंतं किलंअह्मि, गदागदेहिं । ता सणेहिं गंछ । (हला मनोरञ्जनि ! अतिमात्रं क्लान्आस्मि गतागतैः । तस्माच्छनैर्गच्छ ।

मनोरञ्जनी—णादं णादं । तहएंव कलेमि । जदि मणोरहं परिपुंणं करेसि । जं किंविभूसणं पदंते जदि होदि हंवि सणेहिं गंछामि । (ज्ञातं ज्ञातम् । तथैव करोमि । यदि मनोरथं परिपूर्णं करोषि, यत्किमपि भूषणं प्रदत्ते यदि भवती अहमपि शनैर्गच्छामि ।)

रमा—तथा (इति सर्वेपां मुक्ताहरादिकं ददाति ।)

वैतालिकः—(जनान्तिकम् ।) अपिनामास्मिन्माधवे [1]भर्तृदारिका कृतानुरागा संवृत्ता ।

विदूषकः—अले दासीए वुत किंणु मं पुंछेसि ।

तुमं एंव ताए मुहसिरिअं पंखिअ वुंधेहि । अहवा दासीए वुंतिं मणोरंजणिं पुंछ । (अरे दास्याः पुत्र ! किन्नु मां पृच्छसि ? त्वमेव तस्याः मुखश्रियं दृष्ट्वा बुध्यस्व । अथवा दास्याः पुत्रीं मनोरञ्जनीं पृच्छ ।)

वैतालिकः—ज्ञातप्रायमेवैतत् । यदियं—

मदनमदनरूपं माधवं [2]प्रेक्षमाणा
मतिम[3]नवधिरागोन्मादिनीमेव धत्ते ।

---

[1] 'भर्तृदारिका' क,ग. मातृकयोः नास्ति । [2] प्रेक्ष्यमा-ग.
[3] नपथिरा-घ.

न यदि मुखवि[1]कासः स्रंसनं [2]वेणिकायाः
नयनवलनलक्ष्मीनव्य[3]भङ्गी [4]कथं स्यात् ॥ २७ ॥

विदूषकः—(मनोरञ्जनीं प्रत्यपवार्य ।) अए मणोरंजणि कहेहि संचं एंव । एदाए भंटिदारिआए मणो माहवे ! संजदि णवेंति ।

(अये मनोरञ्जनि ! कथय सत्यमेव । एतस्याः भर्तृदारिकायाः मनो माधवे सज्जति न वेति ।)

मनोरञ्जनी—(सभ्रूभङ्गम्) अले ! तुमं एंव जाणासि ! (अरे ! त्वमेव जानासि !)

(इति भर्तृदारिकामुखं दर्शयति ।)

[5]रमा—(सरोषसंरम्भम् ।) मं किलंतं वुंदिसिअ किंवि किंवि जंपसि ?

(मां क्लान्तामुद्दिश्य किमपि किमपि जल्पसि ?)

(इति माल्येन ताडयति ।)

वैतालिकः—(निर्वर्ण्य साश्चर्यम्)

---

[1] कास स्रं-क.ग. [2] वेदिका-घ. [3] भङ्गीकरङ्गी क-क.
[4] करं स्या-क. [5] 'रमा' इत्यारभ्य 'मन्महे' इत्यन्तो भागः क. मातृकायां नास्ति ।

दलन्नीलाम्भोजव्यतिकरपरिस्पर्धिवपुषं
जगद्वीराभिख्या प्रकटनचणानेकविरुदम् ।
नवाम्भो[1]जाताक्षं नम[2]दभयदानव्रतधरं
प्रपश्यैनं देवं [3]प्रमथमसराणामनुपमम् ॥ २८ ॥

रमा—हला ! किलंतम्हि ण पसरंदि पुरदो मम हंदपादाओ ता खणं तिंठ ।

(हला ! क्लान्तास्मि न प्रसरति पुरतो मम हस्तपादं तस्मात् क्षणं तिष्ठ ।)

(इति चक्षुर्विक्षिपति ।)

(नेपथ्ये ।)

अमृतकलशहस्तं हन्त धन्वन्तरिं द्रा-
गसुरविततिरेषा हन्तुमभ्यागताऽभूत् ॥ २९ ॥

(सर्वे सशङ्कात्रासं विद्रवन्ति ।)

(पुनर्नेपथ्ये)

अभयवचनदायी माधवोऽसौ विजित्य
प्रसभमरिनिकायं तं निनाय स्वपार्श्वम् ॥ ३० ॥

(सर्वे समाश्वसन्ति ।)

---

[1] जाचक्षन-घ. [2] दवदनान-ग. [3] प्रथम-क.ख.ग.

मनोरञ्जनी—भट्टिदारिए दिट्ठिआ वड्ढामहे । जं माहवं खणकिदारिविअअं पेंखह्म ।

(भर्तृदारिके ! दिष्ट्या वर्द्धामहे, यन्माधवं क्षणकृतारिविजयं पश्यामः ।)

रमा—(अनाकर्णितकेन ।) (स्वगतम्)

अह्महे वीरत्तणं मणोरहवल्लहस्स -
णं चवदि मुहस्स सिरी
णं कमदि तणुलदावि सुउमारा ।
णं वेच्चसदि माला
एदेण कहं णु रिपुजओ लद्धो ॥३१॥

(अहो वीरत्वं मनोरथवल्लभस्य
न च्यवते मुखस्य श्रीः
न क्लाम्यति तनुलतापि सुकुमारा ।
न व्यत्यस्यति माला
एतेन कथन्नु रिपुजयो लब्धः ॥)

(इति माधवं पश्यति ।)

मनोरञ्जनी—किं एदेण अलसंतणेण ? तेलोक्कवीरस्स एदस्स महुअमालं एव्व पारितोसिअं करेहि । (किं एतेनालसत्वेन? त्रैलोक्यवीराय एतस्मै मधूकमालामेव पारितोषिकं कुरुष्व ।)

विदूषकः—अहंवि वुहतिआं देमि ।

(अहमपि बृहतिकां ददामि ।)

(इत्युत्तरीयं स्रंसति ।)

वैतालिकः—न खल्वेतावदौदार्यं प्रकटयतु भवान् ।
(इति निवारयति।)

रमा—जह तुह्माणं रोअदि हिअअस ।
(यथा युष्माकं रोचते हृदयाय)

सर्वे—प्रियं नः प्रियं नः ।
(इति निष्क्रान्ताः सर्वे ।)

॥ इति द्वितीयोऽङ्कः ॥

तृतीयोऽङ्कः

(ततः प्रविशति मधूकमालाधरः सवधूको माधवः, शिवादयो वैनतेयश्च ।)

माधवः—(स्वगतम्) अहो! शीतलता सुधाया इव तदीय[1]स्पर्शस्य ।
(सोत्साहम् ।)

[2]स्रोतोऽसि चन्दनरसस्य सुधामयूख-
जातामृतद्र[3]वभरप्लवनं किमेतत् ।

---

[1] स्पर्शश्च-ग, [2] स्रोतोर्मि-क.ख.ग. [3] वजर-ग, वकर-घ.

[1]येनाभवन्मनसिजप्रभवप्रतापः
तावानपि क्षणल[2]वापहृतप्रभावः ॥ १ ॥

स्मरामि तस्याः ।

[3]आनङ्गोन्मदलालसैरवयवैः अव्याजचेतोहरैः
आ[4]नन्दैकनिकेत[5]नत्वविरुदैः आलोकसान्द्रामृतैः ।
आग[6]त्याग्रभुवं मधूक[7]कलिकामालां मदीये गले
सा कन्या निदधे फलं [8]हि तपसां एतद्वयं मन्महे ॥ २ ॥

(इति पारवश्यं नाटयति ।)

इतरे—
माधवीमधुसम्बन्धो मनसोऽस्तु मुदावहः ।
स्निग्धयोरनयो[9]रेप चन्द्रिकाचन्द्रयोरिव ॥ ३ ॥

वैनतेयः—अहो ! [10]कथमेकपद एव निरस्तस्तावानपि विरहजन्मा ताप इति नैसर्गिकीमुत्साहवत्तां प्रथयत्येतस्य ।

तथा हि—
मुखमण्डलेऽपि [11]न पुरेव पाण्डिमा
नयनाम्बुमौक्तिकसमं प्रहर्षजम् ।

---

[1] येनभ घ. [2] वादह्-ग. [3] अनङ्गो-क.ख. [4] नङ्गैक-ग.
[5] 'नत्व' क.ख.नास्ति । [6] न्याश्रभु-क.ख. न्यागभु-घ.
[7] कलितां मा-क.ख. [8] हि तवहं ए-ग. [9] रेप: च-क.ग.घ.
[10] कमेकप-क. पथमेकप-घ. [11] वपुरेव.क.

श्वसितं च तापर[1]हितं सुशीतला
तनुकान्तिरेतदखिलं मनोरमम् ॥ ४ ॥

माधवः—(चक्षुषी उन्मील्य वैनतेयं प्रति)

[2]अयि विनतानन्दन ! समयोचित[3]करणाय देशान्तरवासिनो देवगन्धर्वादयः समादिश्यन्ताम् ।

कल्प्यन्तां [4]हरिदन्तदन्तिनिकराः कल्याणवेषाम्बराः
सर्वे [5]पुष्परथाश्चरन्तु गगने सै[6]न्याधिवाहोत्तमैः ।
आयान्त्वद्य सुनन्दनन्दमुखरा [7]ये [8]पारिषद्याधिकाः
सारोऽयं खलु वर्ततेऽब्धिदुहितुः सद्यो विवाहोत्सवः ॥ ५ ॥

इतरे—

न खल्वमी तत्रभवतः सन्देशं आशंसन्ते,
[9]यत्सर्वेष्याग[10]तास्सज्जीभू[11]ताश्च परिचर्यायाम् ।

(नेपथ्ये मृदङ्गध्वनिः । सर्वे आकर्णयन्ति ।)

---

[1] हितस्वशी-क.ग. हितं स्वशी-ख. [2] अये-ख.घ. अइ-ग. [3] करणायं दे-क. [4] हरिदन्तिदन्तनि-ग. [5] पुष्पर-ख. [6] न्यादिवा-क.ग.घ. [7] एषा-ख. [8] निषद्या-ख. [9] तत्त्-क.ग.घ. [10] ताश्च-स-क. [11] ताः प-क.

(पुनर्नेपथ्ये)

जामता जगदेकवीरविरुदप्रख्यातसम्पत्खनिः
योऽयं मानससीम्नि पूर्वनिहितः प्रायो गुणानां निधिः ।
दातव्या यदसावशेषजगतामानन्द[1]सन्दायिनी
[2]कन्याऽस्मै यदि किं [3]ब्रुवे परि[4]णतिं [5]भोग्यस्य भाग्यस्य नः
॥ ६ ॥

सर्वे—[6]कस्येदमुदितम् ? मुदितान्तरङ्गस्य ।

प्रतीहारी—(प्रविश्य) देव ! आअदो एंव एसो उवाअणहंधो परिजणेण साअं साअरो वलुणोवि ।

(देव ! आगत एव एप उपायनहस्तो परिजनैस्साकं सागरो वरुणोऽपि ।)

सर्वे—शीघ्रं [7]प्रवेशय शीघ्रं [8]प्रवेशय ।

प्रतीहारी—तथा (इति निष्क्रान्तः ।)

(ततः प्रविशति सपरिवारो वरुणः सागरश्च ।)

वरुणः—एप खलु सर्वगीर्वाणसार्वभौमः पुरुषोत्तमः ।

---

[1] सन्धानी-क. [2] कन्या वै य-क.ग. कन्यास्मे य-घ.
[3] बृवे-क. [4] णती भो-क.ग. [5] भोगस्य-क.ख. [6] कस्यैद-घ.
[7] प्रविशय-क.ग. [8] प्रविशय-क.ग

[1]येनाकारि समस्तदानवचमूविद्रावणो[2]पद्रवो
येनारक्षि सतां [3]ततिर्निरुपमप्रेमा[4]र्द्रदीव्यद्दृशा ।
येनाघौघतमोनिकृन्तन[5]विधौ मार्ताण्डबिम्बायितं
सोऽयं सम्प्रति नेत्रयोर्विषय इत्येषैव भूपा [6]श्रियः ॥ ७ ॥

सागरः—(सहर्षम् ।)

येयं मूर्तिमतीव सम्पदधुना जाता मदीये गृहे
सा कन्या [7]भुवनैकमङ्गलगुणैर्धन्यापि मान्या जनैः ।
येनासौ जगदेकवीरविरुदश्रीमाधवो [8]यद्भवो
[9]जाता पूर्वकृतैरहो [10]सुचरितैरम्लान[11]शीला[12]वृतैः ॥ ८ ॥

परिजनः—

[[13]यदियं] जगदेकचन्द्रिकातनयाभूद्विन[14]यैकभूषणा ।
अनुरूपवरोपसङ्ग्रहादधुनाभूत्कनकाद्दतो मणिः ॥ ९ ॥

सागरः—(निर्देश्य वरुणं प्रति) महाराज ! के पुनरेतस्य पार्श्ववर्तिनः कथमुपचरितव्या इति प्रष्टव्यमस्ति ।

---

[1] येन का-घ. [2] पत्रपो-क. [3] नति-क.ख. [4] र्दपीव्यद्दृशा-क. र्ददिव्यद्दृशा-घ. [5] विघौ-क. [6] श्रयः-क.ख.ग. [7] भवन-क.ग. [8] यद्भवो-क. [9] जातः-घ. [10] सुचीरतै-क. [11] शील-क. [12] द्रुतैः-ख.घ. [13] यदिदं-क.ग.ख. यदीयं-घ. [14] 'यैक'-ग. नास्ति ।

परिजनः—सर्वे [1]उत्कण्ठिताःस्मः श्रोतव्ये ।

वरुणः—ज्ञातपूर्वा [2]एवैते भवता । तथाऽपि प्रकटीकरोमि । प्रत्यभिजा[3]नातु भवान् ।

यस्य त्व[4]य्यपि [5]मन्थभाजमयता क्षोणीभृता जज्ञिरे
लक्ष्मीरप्सरसां गणस्सुरमणिः कल्पद्रुमाद्या अपि ।
यस्तूर्णं तव कालकूटजनितां जह्रे महादुर्दशां
सोऽयं सर्वविदां शिरोमणिरसौ [6]अभ्येति गौरीपतिः ॥१०॥

सागरः—ज्ञातपूर्वमहिमा खल्वयम् ।

परिजनः—कः खलु तस्य पार्श्वभुवं परिष्करोति सुमनोगणः ।

वरुणः—

अयं चेद्द्विघ्नेशस्सुरपतिरयं नारदमुनि—
[7]स्त्वयश्चागस्त्योऽयं रविरयमयं [1]कुण्डलिविभुः ।
मयश्चायं चन्द्र[8]स्त्वयमयमयं चापि धनदः
सुराणामाचार्योऽप्ययमुप[9]गतो माधवकृपाम् ॥ ११ ॥

---

[1] कुण्डलिविभुः - आदिशेषः ।

---

[1] उत्कण्ठिका स्मः-क.ख. [2] एव तैर्भवता-क. [3] नाम-क. [4] य्यविम-क.ग. [5] मन्द-क.ग. मन्ध-ख. [6] अभ्येत्य-क. लभ्येत्य-ग. [7] स्त्वयचाग-क,ग.घ. [8] स्त्वयममयं-ग, त्वयमयं-क. [9] गता-क.ख.घ.

सागरः—([1]सानन्दम्)

कृतार्थं जन्मेदं फलितमधुना मा[2]मकतपः
किरीटा[3]र्हो मूर्धाऽजनि जनिकृतामात्मजनुषाम् ।
इदानीमेतन्मे [4]कुलमखिलमा[5]सीच्च सफलं
यदेतेऽप्यायाता मम गृहममी माधवयुताः ॥ १२ ॥

परिजनः—अथ किम् ।

(इति सर्वे परिक्रामन्ति ।)

माधवः—[6]अये वैनतेय ! पुरो भव, [7]य[द्व]यमपि सम्भाव[8]यामः प्रत्युद्गमनेन [9]महात्मानं वरुणं सागरं च ।

इतरे—सहजैव खलु तत्रभवतो विनयपरि[10]पाटी ।

वैनतेयः—(पुरो भूत्वा) इत इतः ।

(सर्वे माधवेन सह प्रत्युद्गच्छन्ति ।)

वैनतेयः—[11]एष खलु भगवान् [12]सागरस्सपरिवारः ।

---

[1] "सानन्दम्" क. नास्ति । [2] मकुतपः-घ. [3] 'र्हो'-घ-नास्ति । [4] कल-ग. [5] सीश्च-ग. [6] अरे-क.ग. [7] 'य'-ख.ग.घ. नास्ति । यदय-क. [8] यावः-घ. [9] महत्मा-ग. [10] पाठी-क.घ. [11] स एष-क.ग.घ. [12] "सागरः" ख. नास्ति ।

इतरे—

ऽयोसावसूत भुवनैकललाम[1]कन्यां
यश्चानुकूलवरदानकलाकलापः ।
य[2]स्स्वादुपेयरसक[3]ल्पयिता सुराणां
सोऽयं गुणैकनिधिरम्बुधिरक्षिमार्गे ॥ १३ ॥

माधवः—नायमर्थवादः । महान् खल्वयमम्बुधिर्वरुणश्च ।

सम[4]स्तघनसंसेव्यसर्वतोमुखसम्पदोः ।
अनयोः सममेतद्यदाशा[5]पूरणजीवनम् ॥ १४ ॥
(इति सर्वे उपसरन्ति ।)

सागरवरुणौ—[6]एषः सर्वेषां सुप[7]र्वाद्यधिभुवां अखिलसम्पत्समाजप्रक[8]ट-
नोद्दामः प्रणामः ।

परिजनः—

अहो ! चिरेण स[9]म्प्राप्तमक्ष्णोरेतन्महोत्सवम् ।
वीक्ष्य स्फुरन्ति गात्राणि [10]दाक्षिण्यं स्वं [11]वितन्वते ॥१५॥
(इति प्रणमन्ति ।)

---

[1] कन्या-घ. [2] स्वानुपे-क.ग. [3] ल्प इवासु-क.ग.
[4] स्तघसं-क. [5] पूरणं-क. पूर्ण-ग. [6] "एषः"-क.ग. नास्ति ।
[7] र्वाध्यधि-ख. [8] टनो मप्र-क. [9] म्प्रप्तं दुरे-घ. [10] वाक्षिण्यं-क.
[11] वितन्यते-क.

माधवादयः—

यद्गाम्भीर्यमवार्यमेव जयति स्थैर्यं [1]तदन्यादृशं
मर्यादापरि[2]पालनं च जगतामानन्द[3]सन्दायिकम् ।
तत्सर्वं भवदीयमप्रतिहतं [4]यच्च प्रसादोच्छ्रयः
सर्वत्रापि [5]सदेति हन्त तदिदं तेषां [6]गिरां गोचरे ॥ १६ ॥

(इति हस्ताभ्यां आकृष्य परिरभ्य ताभ्यां सहोपविशन्ति ।)

(नेपथ्ये)

नृत्य[7]न्त्वप्सरसांगणाः सह महावादित्रनादामृतैः
गीयन्तां अमरीजनैस्समुचिता गीतश्रियस्सर्वतः ।
सम्भाराः कुशलोचिताश्च सवि[8]धे सज्जी[9]क्रियन्तां [10]यतः
[11]सम्प्रत्येव गुरूपदिष्ट[12]समयो वैवाहिको वर्तते ॥ १७ ॥

सर्वे—(आकर्ण्य ससम्भ्रमम्) केषामेतत् ?

सागरवरुणौ—मौहूर्तिकानाम् ।

मधूक[13]मालिका माला माधवस्य विवाहकृत् ।
स्वय[14]मेष प्रयत्नस्तु सुज[15]नाचार [16]एव सः ॥ १८ ॥

---

[1] तदान्यादृ-घ. [2] पालनैनं-क. [3] सन्दायक-क.ख.घ. [4] यस्य-ग. [5] सदेत—क.ग. [6] गिरागो—क. [7] न्त्यष्टर-क. [8] धेस्सज्जा-क. [9] कृय-ख. [10] 'यतः' घ. नास्ति । [11] सम्प्रीत्ये-क.ग.घ. [12] समये-ख. [13] मादिका-क. [14] मेव—क. [15] नादार-क. नाकार-ग. नासार-घ. [16] एप-क. येव—घ.

तदत्रैव अतिविलम्बः [1]क्रियते ।

माधवादयः—यद्रोचते तत्रभवद्भ्याम् ।

परिजनः—सर्वेऽप्यलङ्कुर्वन्तु वैवाहिकीं शालाम् ।

(तथेति ससम्भ्रमं निष्क्रान्ताः ।)

(ततः प्रविशति चारणद्वयम् ।)

एकः—अये मल्लिकाचूड ! चिरेण [2]फलितमस्माकं वैवाहिकोत्सवदर्शनेन दिक्पाल[3]कार्याकारणगतागतप्रयासैः ।

द्वितीयः—[4]सखे कुवलयापीड ! सत्यमेतत् ।

[5]सदृग्दम्पत्य[6]सम्पत्योः सन्दर्शनमिहानयोः ।
रमामाधवयोः प्राप्य न मनः कस्य तुष्यति ॥ १९ ॥

(नेपथ्ये)

जितं जितमम्बुधिराजेन यत्सफला संवि[7]देतस्य ।
यश्च लोकैकवीरस्स्याद्यः कल्याणगु[8]णाकरः ।
[9]तस्मै देया मया कन्या धन्या [10]मान्या स्वयं गुणैः ॥इति॥
॥ २० ॥

---

[1] क्रियन्ते-ख. [2] पतितम-क. [3] कार्याः का-क.ग.घ.
[4] 'सखे' क.ग.नास्ति । [5] सादृग्दा-घ. [6] सम्पत्यो स-ग. [7] देवस्य-क.ग. [8] णाश्रयः-क.ग.घ. [9] कस्मै-घ. [10] मन्या-घ.

मल्लिकाचूडः—कस्येदम् ?

कुवलयापीडः—भगवतस्सुरगुरोरेव सुमुहूर्तदर्शिनः ।

मल्लिकाचूडः—(साश्चर्यम्)

[1]य[च्चि]न्तामणिपीठिकाविर[2]चनं यन्मौ[3]क्तिकाद्य[4]क्षता-
व्यापाराकलनं च विद्रुमगणैर्यत्तोरणापादनम् ।
यद्दिव्यामृतभोजनाभ्युपगमो[[5]या चा]प्सरोगीतिका
तत्सर्वं खलु सागरस्य महिमा वर्धते [6]सर्वोपरि ।। २१ ।।

कुवलयापीडः—अथ किम् ।

(नेपथ्ये)

भो ! भो ! शिवादयो नायकाः समीप[7]भाजिनो
भवन्तु भवन्तः । यदयं कृतोद्वाह[8]महामङ्गलो
माधवः पारितोषिकै[9]रा[10]तोषं युष्माकं चिकीर्षति ।

मल्लिकाचूडः—कस्येदम्?

कुवलयापीडः—वैनते[11]यस्यैतत् ।

---

[1] यश्चिन्ता-क.ख.ग.घ. [2] चननिय-क. [3] क्तिकौद्य-क.ख. [4] क्षत-क.ख.घ. [5] यच्चाक्षरो-क. यच्चाप्सरो-ख.ग.घ. [6] सर्पोपरि-क. [7] भाजनो-क. [8] 'महा' ख.ग.घ. नास्ति । [9] राकोषं-ग. [10] तोषयास्माकं-क. ग. [11] यस्यैव-क.ग.घ.

(पुनर्नेपथ्ये)

परितोषप्रदानं हि पारि[1]तोषिकमत्र नः।
पुनस्तद्दानकलना पुनरुक्तिपदं न किम् ॥ २२॥

मल्लिकाचूडः—[2]केषामेतत् ?

कुवलयापीडः—भगवतां शिवादीनां [3]तत्तत्कुलशेखराणां। [4]एतदामोदमेदुराणाम्।

(पुनर्नेपथ्ये)

निखिलसुरासुरमणिमयमकुटनीराजितं पुनर्लभताम्।
सपदि शची[5]पतिरिन्द्रस्साम्राज्यपदं विधूतदै[6]त्येन्द्रः ॥२३॥

कुवलयापीडः—[7]वैवाहिकोत्सवसुखितस्य अत्रभवतो माधवस्य पारितोषिकदानधौरन्धरी। [8]अतः श्रोतव्यमुपर्युपरि कस्मै [9]कस्मै किं किं [10]दीयत इति।

गायकधौरेयपदे नारद एवाभिषिच्यतां विबुधैः।
महती गानकलेयं महती वीणा च यद्गले च करे ॥ २४॥

---

[1] तोषक-ख. ग. [2] 'केषामेतत्'-क.ग. नास्ति। [3] तत्कुल-क. [4] आमोदमे-ग. [5] परिरि-क. [6] त्येन्द्रैः-क. ख. [7] विवाहोत्सव-ग. [8] अत्र-क.ग. [9] 'कस्मै' क. नास्ति। [10] दीय्यत-ग.

मल्लिकाचूडः—श्रुतमेतदपि ।

कुवलयापीडः—श्रोतव्यमुपर्यपि ।

(पुनर्नेपथ्ये)

वेषान्तरं जयति मे [1]यदसावशेष-
भाषागणस्य वदनं पद[2]मास यस्य ।
भूषा[3]शिवस्य भु[4]जगाधिपतामशेषः
[5]शेषो दधातु शयनीयपदं ममैषः ॥२५॥

मल्लिकाचूडः—अहो ! धन्यताप्यनन्त[6]स्या[7]नन्तता ।

कुवलयापीडः—अथ किम् ।

(नेपथ्ये)

विन्ध्यस्तम्भनविख्यात[8]विबुधानन्दनव्रतः ।
अगस्त्यो लभतां नित्यं अखिलर्ष्युप[9]देशताम् ॥२६॥

मल्लिकाचूडः—अये ! महान् अनुग्रहः ।

कुवलयापीडः—[10]पात्रं खल्वेतावतो मुनीन्द्रः ।

---

[1] यद्वेषभा-क. यदशेषभा-ग. [2] मानसस्य-क.ग. मासचस्य-घ. [3] शिरस्य-क.ग. [4] जगोधि-क.ख. [5] शेषा-क. [6] स्याप्यन-ख. [7] नन्ता-क, ग. घ. [8] विधुना-क. [9] देश्यता-ग. [10] पात्रः-ख.ग.घ.

(नेपथ्ये)

यः कालकू[1]टगिल[2]नाद्दतसर्वलोको
यन्मन्दराद्रिकलनेन जजान लक्ष्मीः ।
सोऽयं निरस्तविधिशीर्षविशेषधामा
प्रायस्समस्तभजनीयप[3]देशिता स्यात् ॥२७॥

मल्लिकाचूडः—तदेव वितीर्णमेतस्य यदात्मा[4]गि[न्नस्यौपायि]कम् ।

कुवलयापीडः–सत्यमुक्तं भवता ।

वेषान्तरायातविधुन्तुदोरुमाया[5]गतिख्याप[6]नजात[7]मैत्रौ ।
भानुर्ग्रहाणामपि शीतभा[8]नुर्भानां च नाथत्वपदं लभेताम्
॥ २८ ॥

मल्लिकाचूडः—उ[9]चिता खल्वनु[10]ग्रहरीतिः ।स्वनेत्र[11]स्थानीययोरेतयोः ।

कुवलयापीडः—सखे ! सम्यगालोचितमेतत् ।

(नेपथ्ये)

अविघ्नदानैरमृतादिवस्तुजनिक्रियायामिह [12]यस्सहायः ।
स चैकदन्तोऽभ्यवहारकेल्याः पिचण्डिलत्वं पुनरुक्तमेतु
॥ २९ ॥

---

[1] टगल-क.ग. [2] नावित-क.ग.घ. [3] देशता-क.ग.घ.
[4] भिनःस्योपैकम्-क.ख.ग.घ. [5] गते ख्या-क.ग. [6] नजत-घ. [7] मैत्रा-ग.
[8] नुभानां-क. [9] चितःख-ख. [10] ग्रहारी-घ. ग्रहरीतिः-क.ग.
[11] स्थानयोरे-ख. [12] नस्स-क.ग.

[1]मल्लिकाचूडः—अतीवानुरूपमेतत् ।

कुवलयापीडः—(विहस्य) जन[2]वादोऽयं योग्यं योग्येन सम्बध्यत इति । युक्त एव ।

(नेपथ्ये)

यो विश्वकर्माधिकशिल्प[3]लीलां
सन्दर्श[4]यन्नत्र ततान मैत्रीम् ।
सोऽयं[5]मयः स्वानुभवैक[6]तानः
स्यादीशिता दानवदैत्यपङ्क्तेः ॥ ३० ॥

मल्लिकाचूडः—अहो ! [7]दानवदैत्यरिपोरपि [8]विभोरेतस्मिन्नपि महाननुग्रह इति ।

कुवलयापीडः—पन्था एव एष गुणप्रियाणां महताम् ।

(नेपथ्ये)

यद्वैदग्ध्यादयं यत्नो दुग्धाब्धिमथनादिकः ।
करणं मङ्गल[9]स्यास्य गुरुस्स[10]वार्यतामियात् ॥ ३१ ॥

मल्लिकाचूडः—प्रागेव दत्तमपि पुनरुक्त्या दृढीकृतमाचार्यपदमेतस्य ।

---

[1] "मल्लिकाचूडः-अतीवानुरूपमेतत्" क. नास्ति । [2] वाचोऽयं-ग. [3] शीलां-घ. [4] यन्मित्र-ग. [5] मया-क. [6] तान-क.ग.घ. [7] दानदै-क. [8] भोरतस्मिन्नपि-क, बोरेतस्मिन्न-ग. [9] स्याद्य गु-ख. [10] वर्थिता-क,ख.

कुवलयापीडः—निपुणं खलु मन्त्रितं भवता ।

(नेपथ्ये)

वैवाहिकोत्सवविधानमनोज्ञतायां
भावं निधाय कृतसर्वनिधानदानः ।
[1]यस्सार्थभावमनयद्धनदाभिधां स्वां
सोऽयं जयत्यनुपमान[2]धनः कुबेरः ॥ ३२ ॥

मल्लिकाचूडः—चिरेण खलु नाम सदृशं [3]कर्मैतस्य ।

कुवलयापीडः—चिरसम्भृतिः खलु धनस्य जायते
सफलप्रदानस[4]मयौचितीवशात् ।
सफला [5]तदैव बहुदानचातुरी
जलदस्य मौक्ति[6]ककलेप्यने[7]हसि ॥ ३३ ॥

(नेपथ्ये)

किं बहुना
यथा यथा भवत्यत्र यस्य यस्याभिवाञ्छितम् ।
तथा तथा भवत्येव दैवतप्रेमकारिणाम् ॥ ३४ ॥

मल्लिकाचूडः—[8]सखे! महाननुग्रहसमयोऽयं माधवस्य । तदावाभ्यां [9]अपि पार्श्ववर्तिभ्यां भवितव्यम् ।

---

[1] यस्यार्थ-क.ख.ग. [2] धरः-ख.घ. [3] करै तस्य-क.ग.
[4] मयोचि-क.ख.ग. [5] तथैव-ख. [6] क प्यने-क. क रेव्यप्य-ग.
[7] हसी-क. [8] 'सखे!' घ. नास्ति । [9] 'अपि' क.ग. नास्ति ।

कुवलयापीडः—यद्रोचते प्रियसुहृदे ।

(इति निष्क्रान्तौ ।)

(ततः प्रविशति [1]सवधूको माध[2]वश्शिवादयो वैन[3]तेयस्सगणो-वरुणश्च ।)

शिवादयः—दिष्ट्या सलक्ष्मीकं देवमभिवीक्ष्य मोदामहे ।
[4]तथैवेनमपि लोकोत्तरजामातृभावमुदितं वरुणं च ।

वरुणः—सत्यमेतत् ।

क्व जडप्रकृतिर्जनः क्व चासा-
वजहत्सत्वगुणस्त्रिलोकनाथः ।
क्व च दानकलाप्रतिग्रहः [5]क्वे-
त्ययते विस्मयमस्मदीयचेतः ॥ ३५ ॥

माधवः—

स्वानां न [6]भवतां वाणी [7]स्वातन्त्रयति मा[8]मगुम् ।
[9]सुखं [10]यन्मानसे वर्ते शुकवन्मणिपञ्जरे ॥ ३६ ॥

वैतालिकः—(सहर्षम्)

पुनर्लक्ष्मीम[11]नुप्राप्य पुनरुक्तमयं सुखम् ।
यदेष दृश्यते देवः तदेव तपसां फलम् ॥ ३७ ॥

---

[1] वधू-क.ग. [2] वश्च शि-ग. [3] तेयो व-ख. तेयस्सागरो-ग.
[4] तदैवे-क.ग. [5] केत्य-ख. [6] भवता-घ. [7] स्वतन्त्र-ख.घ. स्यतन्त्र-ग.
[8] मयम्-क. मभम्-ग. [9] सुखा-क.ग. [10] यान्मा-घ. [11] नुवास पु-ग.

रमा—(स्वगतम्) अम्हहे तावं तोविदंविरहसंदावो खणमंतेण एंव-णिउंतो आसि । जो खिल खणंवि कंपसदं कलेदुं णिउणो ।
(अहो ! तावान् तद्विरहसन्तापो क्षणमात्रेणैव निवृत्त आसीत् । यः किरु क्षणमपि कल्पशतं कर्तुं निपुणः ।)

(इति कटाक्षैर्माधवं अभिषिञ्चति ।)

माधवः—(प्रियामभिलक्ष्य सहर्षवैलक्ष्यम्) (स्वगतम्)

अनिद्राणा[1]पेक्षैरचिरहृदयादाननिपुणै-
रलङ्कुर्वा[2]णैर्द्रागसितमणिमालाभिरभितः ।
क[3]टाक्षैरेणाक्षीकवचमकरोद्यद्वपुषि मे
तदेवालं[4]मन्ये विरहप[5]रितापोप[6]शमने ॥ ३८ ॥

(प्रकाशम्) किमिदानीं कर्तव्यमाशंसन्ते भवन्तः ?

[7]सर्वे—किमवशिष्यते पूर्णकामस्य भवतः ।

तथा हि—

[8]जितस्त[9]त्तादृग्यो विरहपरितापो[10]मदनज-
स्त्रिलो[11]कीवीरत्वं दनुजविजयैःख्यापितमभूत् ।

---

[1] पेक्षते-क. पेक्ष्यैर-घ. [2] णैर्ध्रामसि-घ. [3] टाक्षेणा-ग. [4] मन्यं-क. [5] 'रि' ग. नास्ति । [6] शमनम्-क. [7] "सर्वे- किमवशिष्यते पूर्णकामस्य भवतः" क.ग. नास्ति । [8] हित-घ. [9] त्तादृस्पो वि-क, त्तादृश्यो वि-ख. [10] मवन-क.ग. [11] कीभिस्त्वं-क. कीधीरत्वं-ग.

सुखं लब्धा दुग्धाम्बुधितनुभवा च स्वय[1]मियं
परित्यक्तो दूरं प्रणयकलहश्चापि युवयोः ॥ ३९॥

[2]तदद्य नावशिष्यते मनोर[3]थावशेषः। तथा[4]प्येतदेव केवल-
माशास्यम्।

असा[5]वङ्क[6]ग[ता] [[7]तु] [8]स्वादनपायतया [9]तव।
[10]जयत्वयश्च सम्बन्धश्चन्द्रिकाचन्द्रयोरिव ॥ ४० ॥

(रमां प्रति)

यःकल्याणगुणाकर[11]स्त्रिजगतीवीरा[12]ग्रणी वर्तते
[13]यस्मै देयमपत्यरत्नमिति [14]यत्तोयेशितु[15]र्वाञ्छितम्।
तत्पूर्णं कृतकृत्यमप्य[16]मुमितः प्रायः [17]कृतार्थं कथाः
तत्ताद[18]क्कृ[ता]ते[19]मानसानुसरणैः पातिव्रतीसम्पदा ॥ ४१ ॥

रमा—(सलज्जम्) (स्वगतम्) लज्जाए संकुचंदि मह अंगाणि। जं सव्वेहिं देवेहिं णादं पणअकलहं पवंतणं तस्स णिवंतणं अ किंणु कलेमि। (प्रकाशम्) जं भवंतेहिं आणंतं। (स्वगतम्) (लज्जया सङ्कुचन्ति ममाङ्गानि। यत्सर्वैर्देवैर्ज्ञातं प्रणयकलह-प्रवर्तनं तस्य निवर्तनं च। किन्नु करोमि। (प्रकाशम्) यद्भवद्भिः

---

[1] मितीयं-क. [2] तवाद्य-ग. [3] थाशेषः-क. थावेशः-ख.ग.
[4] प्येवदे-घ. [5] वन्तग-घ. [6] गते क.ख.ग.घ.
[7] त-क.ग. त्व-घ. [8] स्यावन-क.ग. [9] तदाव-क. तदा-घ.
[10] जयत्वं-क.ग. [11] स्त्रिजती-क. [12] ग्रणिर्वर्तते-क.ग. [13] तस्मै-ख.घ.
[14] युक्तो ये-क. [15] र्वाभितु-क. [16] मुमतः-क. [17] कृतार्थः-क.
कृतार्थाः-ग. [18] क्कृति-क. कृप्रति-ग. [19] मान्नसूदनु-क. मानुसानु-ग.

आज्ञप्तम् ।) (इति शृङ्गारलज्जां निरूपयन्ती प्रणमति ।)

शिवादयो वरुणश्च—

यल्लीलालव एव सर्वसुमनस्साम्राज्यलाभोत्सवो
[1][यस्यास्सा] करुणाकटाक्षकणिका दारिद्र्यवि[2]द्राविणी ।
[3]तस्यास्ते जगदेकमङ्गलमणीदीपायितायाः पुनः
किं[4]वाऽऽशास्यमिति प्रणामसमये[5] मज्जेम लज्जाम्बुधौ ॥४२॥

वैतालिकः—(ऊर्ध्वमवलोक्य) अनुजानातु भवान् यथा पुरस्स्थान-गमनाय । यदेष [6]यामातिगतया [7]ललाटंतपस्तपनो भविष्यति । वयमपि श्वेतद्वीपवासिनां आ[8]मोदमुपकल्पयिष्यामः ।

शिवादयः—जात एव सर्वेषां जगतामानन्दः, न हि कुमुदामोदसंशय-श्चन्द्रप्रसादसद्भावेऽपि । तथापि तनयाविरहदुर्म[9]नायमानमेनं क्षिप्रमा[10]नन्दयतु भगवान् ।

वैनतेयः—युज्यत एतत् ।

रमा—(स्वगतम्) किंणु खु आसंसिदं वंखदि तादोत्ति आसंका हिअअंस । (प्रकाशम्) (वरुणं प्रत्यपवार्य) ताद ! जं किंवि अहिलसिदं हवे तं कहेहि पूरइंसदि भंटा ।

(स्वगतम्) (किन्नु खल्वाशंसितं वक्ष्यति तात ! इत्याशङ्का हृदयस्य । (प्रकाशम्) (वरुणं प्रत्यपवार्य) तात ! यत्किम-प्यभिलपितं भवेत्तत्कथयस्व पूरयिष्यति भर्ता ।)

---

[1] यस्येयं-क.ख.ग.घ. [2] द्रावणा-क. द्रावणी-ग. [3] तस्तास्ते-क.घ. [4] वा शस्य-ख. [5] मज्जेव-क.ग. [6] यामातितग-क. यामार्धातिग-घ. [7] ललाटस्तलस्त-क. [8] मोपमु-घ. [9] नयामा-घ. [10] नन्दयितुं-क. नन्द-यितु-ग.

माधवः—किं ते भूयः प्रियमुपहरामि ।

वरुणः—दलि[1]ता दानवमाया द्रावितमासीद्बलं तेषाम् ।
निष्प्रत्यूहविलासैर्निर्वृत्तोऽजनि महोत्सवो जगताम् ॥ ४३ ॥

अपि च

प्रतिज्ञेयं [2]पूर्णा मम च [3]कृतिजामातृकलना-
द्धियो[4]गप्रक्षोभस्सपदि युवयोः शान्ति[5]मयितः ।
त्रिलोकी त्वद्दीक्षाजनित[6]मिह नेत्रोत्सवमगात् ।
स्वयं चेयं कन्या मम सपदि धन्या त्वदयनात् ॥ ४४ ॥

तथापीदमस्तु ।

(भरतवाक्यम्)

[7]भूमिस्सदा भव[8]तु सम्भृतसस्यजाता
नाथा भवन्तु निजधर्मरताः पृथिव्याः ।
साहित्यसम्पदभिवृ[9]द्धि[मु]पात्त[10]लोकाः
सर्वान् बुधान् [11]सुखयतु क्षपितान्त[12]रायाः ॥ ४५ ॥

(इति निष्क्रान्ताः सर्वे ।)

।। तृतीयोऽङ्कः समाप्तः ।।

॥ सम्पूर्णश्चायं समवकारः ॥

---

[1] ता हि नव-क.ग. [2] पुर्ना-क. [3] भक्त-क. [4] गः प्र-क.ख.ग. [5] म इतः-ग. [6] मिहि ने-क. [7] भूमिस्तदा-क.ग. [8] तु संस्तृतस-ख. तु सम्प्रति स-ग. तु सन्तत स-क. [9] द्धिरुपा-क.ख.ग.घ. [10] लोका-क.ख.घ. [11] सुखतु-क. [12] राया-क.घ- राय-घ.

पद्यानुक्रमणिका

अ			अङ्क.	श्लो.	पृ.
अणिमादिसिद्धिरपि	....	....	2	13	40
अणुसलइ सुलसमाजं	....	....	2	20	44
अनिद्राणापेक्षैरचिर	....	....	3	38	69
अनुरागवतोरेष	....	....	1	38	21
अन्धकारहरणे यदि दीपः	....	....	1	7	5
अपि नाम प्रियासङ्गम	....	....	1	31	18
अभयवचनदायी	....	....	2	30	50
अमी शिवागस्त्यमयेन्द्र	....	....	2	25	47
अमृतकलशहस्तं	....	....	2	29	50
अमृतासारसंस्पर्शैः	....	....	1	32	18
अयमयं कुसुमाञ्जलि	....	....	1	2	2
अयि प्रिये! तवैवेय	....	....	1	12	8
अयं चेद्विघ्नेशस्सुरपति	....	....	3	11	57
अयं प्रियं मित्रमलीकदृष्टेः	....	....	2	22	46
अविघ्नदानैरमृतादि	....	....	3	29	65
अस्य चैत्ररथं नाम	....	....	2	23	46
असावङ्कगता तु	|....	....	3	40	70
अहो! चिरेण सम्प्राप्त	....	....	3	15	59

आ		अङ्क.	श्लो.	पु.
आकर्ण्य वार्तामरेश्वराणां	....	1	43	24
आगतिर्यत्र कुत्रापि	....	1	13	9
आनङ्गोन्मदलालसैः	....	3	2	53
आहारोऽपि न रोचते	....	1	35	19
इ				
इनं कमलिनी यद्वदिन्दुं	....	2	5	33
उ				
उत्कण्ठाभरसम्पर्कादु	....	1	18	12
ए				
एपो खु दुंगकुविदंखिकोणं	....	2	24	46
क				
कमलिन्या यथा भास्वान्	....	1	15	11
कल्प्यन्तां हरिदन्तदन्ति	....	3	5	54
कविः कृती कृतिरपि	....	1	10	7
कृत्वा वा सुरसाहाय्यं	....	1	33	19
कृतार्थं जन्मेदं फलित	....	3	12	58
क्व जडप्रकृतिर्जनः	....	3	35	68
ग				
गत्वा पुरं च वरुणस्य	....	1	24	15
गत्वा स्वयंवरमहोत्सव	....	1	48	26
गायकधौरेयपदे	....	3	24	63

	अङ्क.	श्लो.	पु.
गरुन्मरुदनीकिनी	1	21	14
च			
चिरसम्भृतिः खलु	3	33	67
ज			
जयतु जनककन्या	1	1	1
जानाति तामनुदितान्य	1	39	21
जामाता जगदेकवीरविरुद	3	6	55
जितस्तत्ताद्दग्यो	3	39	69
ण			
णं चवदि मुहंस सिरी	2	31	51
णिंदयकिदहिंसाणं	2	12	39
त			
तपनस्तपसां रविर्यथा	1	23	15
तथा तथा प्रतिज्ञाय	1	4	4
ताड्यन्ते निबिडं महोत्सव	1	51	29
तावदेवारतिश्चित्ततापो	1	40	21
द			
दलन्नीलाम्भोज	2	28	50
दलिता दानवमाया	3	43	72
ध			
धर्मो विग्रहवानेष	2	18	43

न			अङ्क.	श्लो.	पु.
निर्ऋतिरेष विजयते	....	....	2	19	44
निखिलसुरासुरमणि	....	....	3	23	63
निद्रामुपेत्य तरुमूलतलेषु	....	....	1	29	17
नृत्यन्त्वप्सरसाङ्गणाः	....	....	3	17	60
नैसर्गिकी यदि प्रीतिरन्योन्यं	....	....	1	41	22
प					
पङ्कजवनश्रिताः	....	....	1	30	18
पतंतचामीअरमंजुलंबरो	....	....	2	26	47
परितोषप्रदानं हि	....	....	3	22	63
पादुअंवजणपाणभाअणं	....	....	2	14	40
पुनर्लक्ष्मीमनुप्राप्य	....	....	3	37	68
पूजा या विधिरुद्रमुख्य	....	....	1	20	13
प्रौढप्रतापपरिपोषिणि	....	....	1	27	17
प्रणयकलहाद्यातां	....	....	1	17	12
प्रणयकोपवशेन	....	....	1	37	20
प्रणयात्कलहं प्राप्य	....	....	1	14	11
प्रतिज्ञेयं पूर्णा मम च	....	....	3	44	72
भ					
भूमिस्सदाभवतु	....	....	3	45	72
भो भो भुज! प्रशममेहि	....	....	1	25	16

म			अङ्क.	श्लो.	पृ.
मञ्जावलीपु मदनोपम	....	....	2	10	38
मदनमदनरूपं माधवं	....	....	2	27	48
मधूकमालिका माला	....	....	3	18	60
माधवीमधुसम्बन्धो	....	....	3	3	53
मुखमण्डलेऽपि न पुरेव	....	....	3	4	53
य					
यच्चक्रं दिविजारिवृन्द	....	....	1	36	20
यच्चिन्तामणिपीठिकाविरचनं	....	....	3	21	62
यदनुज्झितसार	....	....	1	34	19
यदा सामाद्युपायानां	....	....	1	22	14
यद्गाम्भीर्यमवार्य	....	....	3	16	60
यदियं जगदेकचन्द्रिका	....	....	3	9	56
यदीक्षितं नेक्षितमेव	....	....	2	1	30
यदुपासनया परं	....	....	2	21	45
यद्वैदग्ध्यादयं यत्नो	....	....	3	31	66
यद्दोर्दण्डविजृम्भि	....	....	2	15	41
यथा यथा भवत्यत्र यस्य	....	....	3	34	67
ययैव सर्वभूतानामी	....	....	1	47	26
यल्लीलालव एव	....	....	3	42	71
यश्च लोकैकवीरस्याद्यः	....	....	1	42	23
यश्च लोकैकवीरस्याद्यः	....	....	1	49	27
यश्च लोकैकवीरस्याद्यः	....	....	3	20	16

		अङ्क.	श्लो.	पु.
यस्तेजोनिधिरित्यतीव	....	2	17	42
यस्य त्वय्यपिमन्थभाव	....	3	10	57
यस्याङ्गणे श्रीमदनीकिनीनां	....	1	8	6
या नो मुञ्चति मामनन्य	....	1	46	26
या सर्वमोहजननैक	....	1	45	25
येनाकारि समस्तदानव	....	3	7	56
येयं मूर्तिमतीव सम्पदधुना	....	3	8	56
ये वेङ्कयार्यसामीप्यमालम्ब्य	....	1	9	6
येषामीपत्करमिव	....	2	11	39
योऽसावसूत भुवनैक	....	3	13	59
योऽसौ मन्मथमन्मथ	....	2	4	32
योऽसौ वेङ्कसुधीचन्द्र	....	1	6	4
यो विश्वकर्माधिक	....	3	30	66
यं कन्या भुवि भर्तारं	....	1	11	8
यः कल्याणगुणाकर	....	3	41	70
यः कालकूटगिलना	....	3	27	65
र				
रत्नाकरसुताया यद्रत्ना	....	2	3	31
लं				
लंक्ष्यन्तेऽगिरयो	....	1	50	28

व	अङ्क.	श्लो.	पृ.
वपुर्जगद्भूषयति स्वयं	2	2	30
वितत्य वैष्णवीं मायां	2	6	33
विद्यातिहृद्यापि न चानवद्या	1	3	3
विधानमस्याः खलु	2	8	35
विनयापचारकलना	1	26	16
विन्ध्यस्तम्भनविख्यात	3	26	64
विबुधदानवमुख्य	1	5	4
वेषान्तरायातविधुन्तु	3	28	65
वेषान्तरं जयति मे	3	25	64
वैवाहिकोत्सवविधान	3	32	67
श			
शार्दूलकृत्तिकृतकञ्चुक	1	44	24
स			
सखि ! ते विधूतिर्विभूषणानां	2	9	35
सद्दग्दाम्पत्यसम्पत्योः	3	19	61
सन्तापमुग्रतर	1	28	17
समस्तघनसंसेव्य	3	14	59
सा मय्यस्त्यनपाय	1	19	13
सुरभूरुह एव पुष्पवाटी	2	16	41
सुरवासवमौनिसिद्ध	2	7	3
स्रोतोऽसि चन्दनरसस्य	3	1	

			अङ्क.	श्लो.	पु.
यस्तेजोनिधिरित्यतीव	....	....	2	17	42
यस्य त्वय्यपिमन्थभाव	....	....	3	10	57
यस्याङ्गणे श्रीमदनीकिनीनां	....	....	1	8	6
या नो मुञ्चति मामनन्य	....	....	1	46	26
या सर्वमोहजननैक	....	....	1	45	25
येनाकारि समस्तदानव	....	....	3	7	56
येयं मूर्तिमतीव सम्पदधुना	....	....	3	8	56
ये वेङ्कयार्यसामीप्यमालम्ब्य	....	....	1	9	6
येषामीपत्करमिव	....	....	2	11	39
योऽसावसूत भुवनैक	....	....	3	13	59
योऽसौ मन्मथमन्मथ	....	....	2	4	32
योऽसौ वेङ्कसुधीचन्द्र	....	....	1	6	4
यो विश्वकर्माधिक	....	....	3	30	66
यं कन्या भुवि भर्तारं	....	....	1	11	8
यः कल्याणगुणाकर	....	....	3	41	70
यः कालकूटगिलना	....	....	3	27	65
र					
रत्नाकरसुताया यद्रत्ना	....	....	2	3	31
ल					
लक्ष्यन्तेऽगिरयो	....	....	1	50	28

व			अङ्क.	श्लो.	पु.
वपुर्जगद्भूषयति स्वयं	....	....	2	2	30
वितत्य वैष्णवीं मायां	....	....	2	6	33
विद्यातिहृद्यापि न चानवद्या	....	....	1	3	3
विधानमस्याः खलु	....	....	2	8	35
विनयापचारकलना	....	....	1	26	16
विन्ध्यस्तम्भनविख्यात	....	....	3	26	64
विवुधदानवमुख्य	....	....	1	5	4
वेषान्तरायातविधुन्तु	....	...	3	28	65
वेषान्तरं जयति मे	....	....	3	25	64
वैवाहिकोत्सवविधान	....	....	3	32	67
श					
शार्दूलकृत्तिकृतकञ्चुक	....	....	1	44	24
स					
सखि ! ते विधृतिर्विभूषणानां	....	....	2	9	35
सदृग्दाम्पत्यसम्पत्योः	....	....	3	19	61
सन्तापमुग्रतर	....	....	1	28	17
समस्तघनसंसेव्य	....	....	3	14	59
सा मय्यस्त्यनपाय	....	....	1	19	13
सुरभूरुह एव पुष्पवाटी	....	....	2	16	41
सुरवासवमौनिसिद्ध	....	....	2	7	34
स्रोतोऽसि चन्दनरसस्य	....	....	3	1	52

		अङ्क.	श्लो.	पु.
स्वानां न भवतां वाणी	... .	3	36	68
ह				
हरिश्चन्द्रो नारदश्च	....	1	16	11

शुद्धिपत्रिका

अशुद्धः	शुद्धः	पृष्टम्	पङ्क्तिः
तपसाम् एप	तपसामेप	3	4
तामुउप	तां उप	7	9
रसी तनया	रसीतनया	10	6
मुपाह	मुपह	14	7
स्वयव	स्वयंव	15	1
श्च्युत	श्च्चुत	17	9
वनतेयः	वैनतेयः	23	11
एंति अउं	एंतिअउं	28	1
महसं	महंसं	36	13
र्गमवे	र्गमावे	45	5
विगुरु	विर्गुरु	47	8
अमीशिवा	अमी शिवा	47	6
क्कान्ता	कान्ता	49	12
नेपेथ्ये	नेपथ्ये	50	10
तेयंः प्र	तेयं प्र	54	3
जामता	जामाता	55	22
ऽयोसा	योऽसा	59	1
क्रिं बहुना	किं बहुना	67	13
गणो-व	गणो व	68	3